# नागेशकौण्डभट्टमतयोः लकारार्थसमीक्षणम्

**योगराजः कण्डेलः**
सहायक प्राध्यापकः नव्यव्याकरण विभाग
परमानन्द संस्कृतगुरुकुल-विद्यापीठम्, देवघाटधाम, तनहुँ, नेपाल
Email : yograjkandel5@gmail.com
*https://doi.org/10.3126/haimaprabha.v21i01.44860*

**सारसङ्क्षेपः**

*शब्दशास्त्रे प्रतिपादितानां दशलकाराणां ये ये अर्थाः सन्ति तेषामर्थानां शास्त्रसम्मतं व्याख्यानमत्र कृतमस्ति । व्याकरणे दशलकाराः सन्ति तथा च भिन्न-भिन्नार्थेषु तेषां निरूपणं विहितमस्ति । पूर्वं तावत् लडादयः षट्लिलकाराः क्रमशः वर्तमानादिष्वर्थेषु विधीयन्ते । अर्थादेष्वर्थेषु लडादीनां विधानं भवतीति । अर्थात् लकराणामेव वाचकत्वमित्यभिप्रायः । यदि लकाराणां वाचकत्वं स्वीक्रियते तर्हि शक्यतावच्छेकत्वं भवति लत्वं तेन लाघवं प्रतिभाति । लादेशानां तिङादीनां वाचकत्वे तु नानाशक्ततावच्छेदकत्वस्वीकारे महद्गौरवम् । अत्र च लकाराणां वाचकत्वस्वीकाराय लाघवरूपं प्रमाणम्, तिबादीनां वाचकत्वे तु उच्चार्यमाणः शब्दः सम्प्रत्यायको भवति इति भाष्यप्रमाणमेव । तेनोभयोर्वाचकत्वपक्षे युक्तेर्विद्यमानत्वाद् यस्य कस्यापि भवतु वाचकत्वमिति न विषेशोऽऽग्रहः । सामान्यतया कर्ता, कर्म, संख्या, काल इति चत्वारो लाकाराणामर्थाः भवन्ति । आचार्यनागेशस्तु एष्वर्थेषु लादेशानां तिङादीनां शक्तिः स्वीकरोति । लोके लादेशानां तिबादीनामेव प्रयोगो दृश्यते, न तु लकाराणामिति । तथा च भाष्यकारोऽपि ब्रवीति उच्चार्यमाणः शब्दः संप्रत्यायको भवति इति तेन लोके प्रयुक्तानामेव तिङादीनां वाचकत्वमुपयुक्तमिति प्रतिभाति । भवतु तावद्यस्य कस्यापि वाचकत्वं तथापि सामान्यतया यथा पूर्वं तावद् कालो द्विविधः अद्यतनः, अनद्यतनश्चेति । तत्र प्रथमस्तावद् भूतभविष्यत्वर्तमानभेदेन त्रिविधः । द्वितीये च वर्तमानत्वासम्भवाद् भूतभविष्यत्भेदेन द्विविधः एवेति । आचार्यभर्तृहरिस्तु स्वकीयवाक्यपदीयग्रन्थे कालस्य व्यवहारिकदृष्ट्या एकादशभेदाः सन्तीति वर्णयति । तथा च सामान्यतया वर्तमानत्वे लट्, भूतत्वमात्रे लुङ्, भविष्यत्त्वमात्रे लृट्, हेतुहेतुमद्भावाद्यधिकार्थविवक्षायां लृङ्, अनद्यतने भूतत्वेन विवक्षिते लङ्, पुनश्च तत्रैव परोक्षत्वविवक्षायां लिट् तथा चानद्यतनभविष्यति लुडिति एवं प्रकारेणाः लकाराः भवन्तीति विज्ञेयम् । एतेषां दशलकाराणां सोदाहरणपूर्वकं परिचयं निरूप्य लकारसामान्यस्य तथा लकारविशेषाणां वा अर्थानां विवेचनमत्रास्ति ।*

**शब्दकुञ्जी**

अनद्यतनः, बोधकता, श्वसनः, हेतुहेतुमद्भावः, निकायः

## विषयपरिचयः

व्याकरणशास्त्रे दशलकाणां चर्चा दरीदृश्यते । तत्र च लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ्, एतेषां दशलकाराणां निरूपणं विद्यते । एषु पञ्चमो लकारः तावच्छन्दमात्रगाचरः, अर्थादस्य लकारस्य प्रयोगो छन्दसि एव भवति । अत्रालेखे लकाराणां सामान्यपरिचयपूर्वकं कस्मिन् कस्मिन्नर्थे एतेषां

लकाराणां प्रयोगो भवति इत्यस्मिन् विषयेऽपि नागेशकौण्डभट्टदिशा व्याख्यानं विहितमस्ति । लट्लकारस्य प्रयोगः वर्त्तमानार्थे भवति । लिट्लकारस्य प्रयोगस्तावद् परोक्षभूतार्थे भवति । एवं प्रकारेण क्रमशः लुट्-लृट्लकारयोः भविष्यदर्थे, लेट्लोट्लिङादिलकाराणामुपयोगस्तु विध्याद्यर्थेषु भवति । लङ्लुङोः भूतार्थे प्रयोगः, चरमस्य तु हेतुहेतुमद्भावे प्रयोगः क्रियते। यद्यप्यत्र सामान्यरूपेण परिचयो दत्तः तथापि विस्तृतरूपेण व्याख्यानं तु अधः क्रियते । आलेखेऽस्मिन् वैयाकरणनिकाये प्रसिद्धानां दशलकाराणां सामन्यपरिचयः, तथा च लकारार्थविषये विदुषां यन्मतवैविध्यं वर्तते तस्यापि चर्चा विहितास्ति तदेवास्यालेखस्योद्देश्यं वर्तते। तथा च परमलघुमञ्जूषाभूषणसारग्रन्थानुसारं नागेशकौण्डभट्टयोः मते लकारार्थनिरूपणावसरे यन्मतवैविध्यं विद्यते तस्य भाष्यसम्मतं स्पष्टतया प्रतिपादनम्, व्याख्यानम्, विवेचनम् तथा च शब्दशास्त्रदृष्ट्या विश्लेषणमेवास्यानुसन्धानात्मकलेखस्य मूलं क्षेत्रं सीमा च वर्तते ।

## अध्ययनविधिः

मुख्यतया पुस्तकालयीयविधिमवलम्ब्यैव विहितमिदमध्ययनम् । अत्र च परमलघुमञ्जुषा तथा च वैयाकरणभूषणसारः इति द्वौ ग्रन्थौ तथा च तदभिमतप्रतिपादकाः टीकाग्रन्थाश्च, संस्कृतमूलकारग्रन्थाश्च प्रमुखसामग्रीत्वेन प्रयुक्ताः वर्तन्ते । अनुसन्धानेऽस्मिन् हिन्दीनेपाल्यादिभाषायां लिखिता अनूदिताश्च व्याकरणसम्बद्धाः लकारार्थप्रतिपादकाः ग्रन्था अपि द्वितीयसामग्रीत्वेन गृहीतास्सन्ति ।

## सैद्धान्तिकपर्याधारः

व्याकरणं खलु शब्दानुशासनशास्त्रम्। असाधुशब्देभ्यो विविच्य साधुशब्दाः निष्पाद्यन्ते व्याकरणेन। पुण्यजनकतावच्छेदकता साधुशब्देष्वेव भवति । व्याकरणे वाक्यस्फोटस्यैव मुख्यत्वं सर्वैः स्वीकृतं तथापि वर्णपदादीनामपि आवश्यकत्वमपि भवत्येव। पदादपि भवति अर्थबोधस्तु तथापि निराकाङ्क्षार्थबोधकता वाक्य एव विद्यते तेन वाक्यफोटस्यैव प्रधानत्वमङ्गीकृतम् शाब्दिकैः। सुबन्ततदादिघटितस्य तिङन्ततदादिघटितस्य शब्दस्यैव पदत्वमाचार्यणेन सुप्तिङन्तं पदमिति सूत्रे प्रतिपादितम्। वाक्ये विधेयरूपेण क्रियापदानां प्रयोगो भवति । भ्वादिगणपठितानां शब्दानां क्रियावाचकत्वे सति धातुसंज्ञा भवति । ततः धातुभ्य एव लडादयो विधीयन्ते। वर्तमानादिष्वर्थेषु ते लकाराः भवन्ति। नागेशभट्टस्य तथा च कौण्डभट्टस्य च लकारार्थविषये यानि मतानि सन्ति तेषां परमलघुमञ्जूषा-भूषणसारग्रन्थानुसानं विवेचनम् एवञ्च तयोर्मध्ये यानि मतवैविध्यानि विद्यन्ते तेषां भाष्यदिशा व्याख्यानं समाधानमपि विहितमस्ति । विषेशत उभयोः मतयोः तुलनात्मकाध्ययनपूर्वकं समीक्षणमत्रालेखे कृतमस्ति, मध्ये मध्ये कालविषये तथा तथा च कालभेदविषये च आचार्यभर्तृहरेः सम्मतञ्च सप्रमाणमत्रोपन्यस्तम् । अत्र उभयोर्ग्रन्थयोतुलनापेक्षया स्वत्रन्त्ररूपेण द्वयोर्मतसमीक्षणमेव प्राधान्येन कृतमस्ति। कर्ता, कर्म, संख्या, काल इति चत्वारो लाकाराणामर्थाः भवन्ति। आचार्यनागेशस्तु एष्वर्थेषु लादेशभूतानां तिङादीनां शक्तिं स्वीकरोति । नागेशमते लोके लादेशानां तिबादीनामेव प्रयोगो दृश्यते, न तु लकाराणामिति। भाष्यकारोऽपि तत्र प्रसङ्गे वदति- उच्चार्यमाणः शब्दः संप्रत्यायको भवति तेन लोके प्रयुक्तानामेव तिङादीनां वाचकत्वमुपयुक्तमिति नागेशाभिप्रायः । किन्तु अस्मिन्पक्षे लः कर्मणि च भावे चाकर्मकेभ्यः, वर्तमाने लट् इत्यादिसूत्राणामसङ्गतं तु दृश्यत एव। लडादीनां वर्तमाने लट् इत्यादिसूत्रैः तत्तत्काल एव लकाराणां विधानं भवति । तेन नागेशमते सूत्रकाराद् वैमत्यं दृश्यते, तस्य समाधानञ्च एवं करोति नागेशः तिङादीनां वाच्यार्थत्वात् तत्स्थानिनि लकारे आरोप्य तत्तत्सूत्रैः

तेष्वर्थेषु लकाराः विधीयन्ते । कौण्डभट्टोऽपि प्रतिपादयति बोधकतारूपां तिबादिशक्तिं तत्स्थानिकत्वेन कल्पिते लकारे प्रकल्प्य लकाराः कर्मणि कर्तरि चानेन विधीयन्ते, नकारविसर्गादिनिष्ठां कर्मकरणादिबोधकतां शक्तिमादाय शसादिविधानवदिति । एतावता लकाराणां तिबादीनां वा वाचकत्वदिविषये विद्यमानत्वेऽपि मतवैविध्ये उभयोः शरणं तु भाष्यमेव । तेन नागेशेने यदभिप्रायं प्रतिपादितं अन्ते च कौण्डभट्टेनापि तत्रैव सम्मतिः स्वीकृता । यतो हि वैयाकरणानां निकाये भाष्यसम्मतं व्याख्यानमेव सर्वै आदर्तव्यं भवतीति ।

## विषयनिरूपणम्

लकाराणामर्थनिरूपणावसरे आचार्यदीक्षितेन स्वस्य शब्दकौस्तुभनाम्नि ग्रन्थे एका कारिका उक्ता -

वर्त्तमाने परोक्षे श्वो भाविन्यथ भविष्यति ।
विध्यादौ प्रार्थनादौ च क्रमाज्ज्ञेया लडादयः ॥

लडादयः षट्टिल्लकाराः क्रमशः वर्तमानादिष्वर्थेषु विधीयन्ते । अर्थादेष्वर्थेषु लडादीनां विधानं भवतीति । एतावता दीक्षितमते लकराणामेव वाचकत्वमित्यभिप्रायः । कौण्डभट्टोऽपि एवं प्रतिपादयति । यद्यपि कौण्डभट्टमते लकाराणां तिङादीनां वा वाचकत्वं भवतु इत्यत्र तथाग्रहो नैवास्ति । तथापि आश्रये तु तिङः स्मृताः इत्यनेन कर्तरि कर्मणि च तिङ एव शक्तिर्निरूपिता (द्विवेदी, सन् २०१८, पृ. ६) । कर्तृकर्मणोः तिङ्वाच्यत्वमेवाङ्गीकृतं बहुयुक्तिबलैः । कौण्डभट्टस्तु भूषणग्रन्थे कर्तरि कर्मणि च तिङां शक्तिः तथा च लकाराणां काले शक्तिः इति एवं प्रतिपादियति तेन तस्य मते लकाराणां लादेशानां वा वाचकत्वे न कश्चिन विशेषाऽग्रहः । यदि लकाराणां वाचकत्वं स्वीक्रियते तर्हि शक्यतावच्छेकत्वं भवति लत्वं तेन लाघवं प्रतिभाति । लादेशानां तिङादीनां वाचकत्वे तु नानाशक्ततावच्छेदकत्वस्वीकारे महद्गौरवम् । अत्र च लकाराणां वाचकत्वस्वीकाराय लाघवरूपं प्रमाणम्, तिबादीनां वाचकत्वे तु उच्चार्यमाणः शब्दः सम्प्रत्यायको भवति इति भाष्यमेव प्रमाणम् । तेनोभयोर्वाचकत्वपक्षे युक्तेर्विद्यमानत्वाद् यस्य कस्यापि भवतु वाचकत्वमिति न विशेषाऽऽग्रहः कौण्डभट्टमते । सामान्यतया कर्ता, कर्म, संख्या, काल इति चत्वारो लाकाराणामर्थाः भवन्ति । आचार्यनागेशस्तु एष्वर्थेषु लादेशानां तिङादीनां शक्तिं स्वीकरोति । उक्तञ्च नागेशेन परमलघुमञ्जुषायां लादेशविचारप्रसङ्गे - तत्र संख्याविशेष-कालविशेष-कारकविशेषभावा लादेशमात्रस्यार्थाः (मिश्र सन् २००६, पृ. ११८) । नागेशमते लोके लादेशानां तिबादीनामेव प्रयोगो दृश्यते, न तु लकाराणामिति । तथा च भाष्यकारोऽपि ब्रवीति उच्चार्यमाणः शब्दः संप्रत्यायको भवति (महाभाष्यम्, १/१/६९, पृ. ३७२) इति तेन लोके प्रयुक्तानामेव तिङादीनां वाचकत्वमुपयुक्तमिति स्वीकृत्य लादेशार्थविचारः नागेशेन विहितः मञ्जूषाग्रन्थे । यद्यप्यस्मिन्पक्षे लः कर्मणि च भावे चाकर्मकेभ्यः, वर्तमाने लट् इत्यादिसूत्राणामसङ्गतं दृश्यते । सकर्मकेभ्यो धातुभ्यो लकाराः कर्मणि कर्तरि च, अकर्मकेभ्यो धातुभ्यो लकाराः कर्तरि भावे च भवन्तीति सूत्रार्थः (शर्मा, सन् २००४, पृ. १८१) एवञ्च लडादीनां वर्तमाने लट् इत्यादिसूत्रैः तत्तत्काले एव लकाराणां विधानं भवति । तेन नागेशमते सूत्रकाराद् वैमत्यं दृश्यते, तस्य समाधानोपायं कथयति नागेशः वर्तमाने लडित्यादिविधायकाः लः कर्मणि इति शक्तिग्राहकसूत्राणामादेशार्थं स्थानिन्यारोप्य प्रवृत्तिः । अर्थात् तिङादीनां वाच्यार्थत्वात् तत्स्थानिनि लकारे आरोप्य तत्तत्सूत्रैः तेष्वर्थेषु लकाराः विधीयन्ते । कौण्डभट्टेनापि उक्तम् - बोधकतारूपां तिबादिशक्तिं तत्स्थानिकत्वेन कल्पिते लकारे प्रकल्प्य लकाराः कर्मणि कर्तरि चानेन विधीयन्ते, नकारविसर्गादिनिष्ठां कर्मकरणादिबोधकतां शक्तिमादाय

शसादिविधानवदिति (मिश्र, २०७३, पृ.८५) । लकाराणां, लादेशानां वा कर्तृकर्मसंख्याकालाः सामान्यतोऽर्थाः वैयाकरणनिकाये प्रसिद्धाः । तत्र संख्या च कर्तृप्रत्ययसमभिहारस्थले कर्तरि एवञ्च कर्मप्रत्ययसमभिहारस्थले च कर्मणि विशेषणं भवति । कालस्तु सर्वथा धात्वर्थव्यापारे एव विशेषणं भवतीति शाब्दिकानां राद्धान्तः । तार्किकाणां मते तु तिङर्थः कृतिरेव । न तु कर्तृकर्मणीति । कर्तरि शक्तिकल्पनापेक्षया कृतौ शक्तिस्वीकारे शक्यतावच्छेदकदृष्ट्या लाघवं भवतीति तार्किकाः । तेन तार्किकाः कृतिरेवाख्यातार्थ इति स्वीकुर्वन्ति ।

**लट्लकारार्थनिरूपणम्**

अत्र दशलकाराणामर्थाः निरूप्यन्ते । समान्यतया वर्तमानकालविशिष्टक्रियावाचकाद् धातोर्लट्लकारो भवतु इति वर्तमाने लट् इति सामान्यसूत्रार्थः (शर्मा, सन् २००४, पृ. १८१) । वर्तमानत्वं किमित्यस्मिन् विषये कौण्डभट्टः प्रारब्धापरिसमाप्तत्वम्, भूतभविष्यद्भिन्नत्वं वा वर्तमानत्वमिति वदति । नागेशस्तु मञ्जुषायां प्रारब्धापरिसमाप्तक्रियोपलक्षिततत्वम् वर्तमानकालत्वमिति (त्रिपाठी, २०४१, पृ. १८४) । एवञ्च प्रारब्धापरिसमाप्तत्वरूपवर्तमानत्वस्वीकारे यावदभिमतफलप्रयोजिकायाः क्रियायाः समाप्तिर्न भवति तावद् वर्तमानत्वमिति । तेन ओदनं पचति इत्यादौ अधिश्रयणादारभ्य फुत्कारत्वाधःश्रयणान्तव्यापारसमूहस्य पच्धात्वादिवाच्यत्वेनाधिश्रयणक्रियायाः परिसमाप्तत्वेप्यधःश्रयणादिक्रियायाः आसमाप्तिदशायां वर्तमानस्याक्षुण्णतयाधःश्रयणपर्यन्तं पचतीति प्रयोगः सम्भवति । भूषणसारे कौण्डभट्टेनापि कथितम्- पचति इत्यादावधिश्रयणाद्यधःश्रयणान्ते मध्ये तदस्तीति लट्प्रयोगः । पुनश्चात्र वर्तमानकालविषये एका शङ्का जायते - यतो हि कोऽपि अध्ययने प्रवृत्ते तत्समाप्त्यभावे एव मध्ये भोजनादिक्रिया कुर्वति कर्तरि वर्तमानप्रयोगो न स्याद् मध्ये भोजनादिक्रियायाः व्यवधानाद् । उक्तञ्चापि वार्तिककारेण प्रवृत्तस्याविरामे शिष्या भवन्त्यवर्तमानत्वाद् । तत्रैव प्रदीपटीकायां कैयटेन व्याख्यातम् इहाधीमहे इत्यध्ययनं प्रवृत्तं प्रारब्धं न च तद् विरतम् । यदा भोजनादिकं कुर्वन्तो नाधीयते, तदाऽधीमह इति प्रयोगो न प्राप्नोति । एतावता कैयटस्यानेन व्याख्यानेन ज्ञायते यद् वर्तमानकालस्य प्रयोगस्तत्रैव भवति, यत्र क्रिया प्रारब्धा न तूपरता । तथा च यत्र क्रियान्तरव्यवहितत्वेनोपरता तत्र न वर्तमानकालत्वम् । तथैव प्रवृत्तेऽध्ययने ततो विरतेऽपि मध्ये भोजनादिनाऽव्यवाये तत्कालेऽधीते इति प्रयोगो न भवितुमर्हति । भाष्यकारमते तु यत्र क्रियारम्भस्य समाप्तिर्नास्ति, तत्र वर्तमानकालः । तेन अध्ययनक्रियायां प्रारब्धायां तस्याः समाप्तिपर्यन्तं सत्यपि भोजनादिक्रियाव्यवधाने तस्यां वर्तमानकालतास्त्येव । व्यवधानरूपेण प्रतीयमानायाः भोजनादिक्रियायाः नान्तरीकत्वान्न वर्तमानत्वक्षतिः । यथा भोजनकालेऽपि तत्र हसनजल्पनादिक्रियायाः व्यवधानं भवत्येव तथापि तत्र सुफलः भुङ्क्ते इत्येव प्रयोग उपपद्यते । तनैव प्रकारेण अधीते इत्यत्र वर्तमानकालत्वेऽपि अनापत्तिरिति भाष्यकारस्याभिप्रायः । आचार्यभर्तृहरिणाऽपि स्वकीयवाक्यपदीयग्रन्थे एतदेव प्रतिपादितम् -

व्यवधानमिवोपैति निवृत्त इव दृश्यते ।
क्रियासमूहो भुज्यादिरन्तरालप्रवृतिभिः ॥
न च विच्छिन्नरूपोऽपि सो विरामान्निवर्तते ।
सर्वैव हि क्रियाऽन्येन संकीर्णैवोपलभ्यते ॥
तदन्तरालदृष्टा वा सर्वैवावयवक्रिया ।
सादृश्याद् सति भेदे तु तदङ्गत्वेन गृह्यते ॥ (वाक्यपदीयम्, कारिका ८२-८४)

अर्थात् निमेषस्वसनादिक्रियायाः सर्वत्र सर्वदा विद्यमानत्वाद् अविच्छिन्ना क्रिया क्वापि कदापि सम्भवत्येव न हि । क्रियान्तरस्य व्यवधानं तु भवत्येव सर्वदा । यथा अध्ययनं कुर्वन् सुनीलः मध्ये श्वसन-पादसञ्चालन-हसन-जल्पनादिक्रिया करोत्येव । तथा सति नान्तरीयकतया मध्यवर्तिनीभिः क्रियाभिः मुख्यक्रियायाः व्यवधानत्वेऽपि अधीते, भुङ्क्ते इत्यादौ न वर्तमानत्वे क्षतिरिति । एवञ्च मध्ये नैयत्येन रूपेण समागताः सर्वापि क्रियाः मुख्यक्रियायाः सहायकाः भवन्तीति भाष्यकारस्याभिमतमस्ति, तत्रैव भतृहरेरपि सम्मतिर्दृश्यते इति । तथा सति सामान्यतया वर्तमानत्वं नाम प्रारब्धापरिसमाप्तत्वम्, भूतभविष्द्भिन्नत्वं वेति । तेन आदनं पचति इत्यादौ अधिश्रयणाद्यधःश्रयणान्ते मध्ये तदस्ति तेन पचति इति लट्लकारस्य प्रयोगः । पुनश्चात्र शङ्का जायते सामान्यतया अनित्यपदार्थेषु सुफलः ओदनं पचति, आशुतोषः पाठं पठति इत्यादौ प्रारब्धापरिसमाप्तत्वं दृश्यते तेन लट्लकारस्य प्रयोगो भवत्येव । तथा च नित्यप्रवृत्ते पर्वते, आत्मादौ वा साध्यत्वविरहेण क्रियारूपाभावाद्, क्रियाधर्मस्य वर्तमानकालस्यापि तत्रासम्भवाद् पर्वतः अस्ति/पर्वताः सन्ति, आत्मा अस्ति/आत्मानः सन्ति इत्यादयः प्रयोगाः नैव सम्भवन्ति । यतो हि नित्यप्रवृत्तानां पर्वतादीनां भूतकालेन भविष्यत्कालेन च सम्बन्धाभावाद्, तस्य प्रतिद्वन्द्वीभूतस्य (त्रिपाठी, २०७७ (३/२/१२३), पृ. १८३) वर्तमानकालस्यापि तत्र सम्बन्धो नैव भवितुमर्हति । कैयटोऽपि वदति- नित्यप्रवृत्तस्य भूतभविष्यत्वाभावाद् वर्तमानत्वाभावः, क्रियारूपाभावाच्चेति । एवञ्च पर्वताः सन्ति, आत्मास्तीत्यादिप्रयोगाणामनुपपत्तिरेवेति । समाधानं तु कस्यापि वस्तुनः आत्मनि, स्वरूपे वा भेदो न भवति । भेदस्तावद् उपाधिसंसर्गकृत एव । तथा सति नित्यपदार्थेष्वपि कालविभागः सम्भवत्येव यथा पर्वतः अस्ति, नद्यः वहन्ति, आत्मा अस्ति इत्यादौ नित्यप्रवृत्तिद्योतकवाक्ये तत्तत्कालस्थितानां राज्ञां क्रियाधारेण कालविभागः कर्तुं शक्यत एव । भवति च राज्ञां क्रियायां त्रैकाल्यं क्रमिकता साध्यरूपता च । तेन तत्साहचर्याद् आत्मादावपि त्रैकाल्यसम्भवेन भूतभविष्यत्वर्तमानादिकालानां संयोगो भवत्येव । वाक्यपदीयग्रन्थे आचार्येणापि प्रतिपादितमेतद्-

परतो भिद्यते सर्वमात्मा तु न विकल्पते ।
पर्वतादिस्थितिस्तस्मात्पररूपेण भिद्यते ॥ (शुक्ल, २०१९, पृ. १३४)

पूर्वपक्षिरूपेणात्र सत्यपि वैमत्यानन्त्यमेव तथापि अन्ते भर्तृहरि-पतञ्जलि-कैयटादीनां व्याख्यानेन अवज्ञायते यद् प्रारब्धापरिसमाप्तक्रियाधिकरणसमयत्वमेव वर्तमानत्वमिति तथा च विद्यमानध्वंसप्रतियोगिसमयत्वमेव भूतत्वं वर्तमानप्रागभावप्रतियोगिसमयत्वमेव भविष्यत्वमिति सिद्ध्यति । तथा सति पर्वताः सन्ति, स्थास्यन्ति पर्वताः, तस्थुः पर्वताः इत्यादिरूपेण पर्वतादीनामपि तत्तत्कालयोग उपपद्यत एव । अस्तु तावद् लड्लकारस्य वर्तमानकालत्वं सुनिश्चितम् । नागेशादीनां आदेशवाचकत्ववादीनां मते तु लटो वाचकत्वं न भवति अपि तु लडादेबतिबादीनामेव वाचकत्वमिति । लडादेशस्य च वर्तमानकालः, कर्तरि प्रत्यये कर्ता, भावकर्मप्रत्ययस्थले भावकर्मणि शबादितिङ्यगादिसमभिव्याहारे च संख्या वाच्या । तथा च परमलघुमञ्जूषायां नागेशेनोक्तम् - लादेशस्य शबादिसमभिव्याहारे कर्ता यक्चिण्समभिव्याहारे भावकर्मणि, उभयसमभिव्याहारे संख्या चार्थः । तेनैव कर्तृकर्मणोराख्यातवाच्यत्वे पचति इत्यत्र कर्तृकर्मणोरुभयोरपि बोधापत्तिः । सकृदुच्चरितः शब्दः सकृदेवार्थं गमयतीति रीत्या एकस्यैव पर्यायेण बोधो भवितुमर्हति इत्युच्यते चेत् कदाचित् कर्तृमात्रबोधवत्, कर्ममात्रस्यैव वा बोधो स्यादिति शङ्का भवत्येव तेन तस्य समाधानं भूषणग्रन्थे आचार्यकौण्डभट्टेन एवं प्रकारेण विहितम् -

फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः ।
व्यापारे शप्श्नमाद्यस्तु द्योतयन्त्याश्रयान्वयम् ॥ (पञ्चोली, २०६८, पृ. ८५)

अर्थात् तङ्यक्चिणादयः फले, शब्श्नम्तिाबादयस्तु व्यापारे आश्रयस्यान्वयं बोधयन्ति । तथा च यत्र यागादिप्रत्ययानां समभिव्याहारो भवति तत्र तिङः कर्मद्योतकत्वमिति । यत्र च पुनः शबादिप्रत्ययानां समभिव्याहारस्तत्र कर्तृद्योतकत्वमिति ।

**लिट्लकारार्थः**

सामान्यतया अनद्यतने भूते परोक्षे च विद्यमानक्रियावाचकात् धातोर्लिट्लकारो भवतु इति परोक्षे लिट् इति सूत्रस्यार्थः (शर्मा, सन् २००४, १८५) । एवञ्चानेन सूत्रेण भूतानद्यतने परोक्षे च लिड्-लकारस्य विधानात् अनद्यतनभूतकालपरोक्षत्वञ्च लिडर्थः । मञ्जूषायां नागेशेनाप्यभिहितम् लिट्तिङस्तु भूतानद्यतनकालः परोक्षत्वञ्चाधिकोऽर्थः । अत्र च अनद्यतनः कः ? इत्यस्मिने विषये वैयाकरणानां मतैक्यं न दृश्यते । न विद्यतेऽद्यतनो यस्मिन् इति बहुब्रीहिसमासेन निष्पद्यते अनद्यतनशब्दः । सामान्यतया सम्पूर्णो दिवसः, व्यतीतायाः रात्रेश्च चतुर्थो भागः आगामिन्याश्च प्रथमो भागोऽद्यतनपदेन गृह्यते । तथा चोक्तम् महाभाष्यस्य प्रदीपटीकायां रात्रेश्चतुर्थो यामो दिवसश्च सर्वो द्वितीयाश्चरात्रेः प्रथमोऽद्यतनः इति (त्रिपाठी, २०७७, पृ. १७५) । आचार्यन्यासकारेण लुङ् इति सूत्रस्य व्याख्यानावसरे एतदेव प्रतिपादितम् । तत्र व्याख्याने तेन दिवसः सकलोऽतिक्रान्तायाः रात्रेश्चतुर्थो याम आगामिन्याश्च प्रथमो याम इत्येषोऽद्यतनः कालः इति । दीक्षितस्तु सिद्धान्तकौमुद्यां अतीतायाः रात्रेः पश्चार्धेनागामिन्याश्च पूर्वार्धेन च सहितो दिवसोऽद्यतनः (शर्मा, सन् २००४, पृ.३०१) । परोक्षत्वं नाम इन्द्रियजन्यज्ञानाविषयत्वमिति । परोक्षशब्दस्य निष्पत्तिस्तु अक्ष्णः परः परोक्षमिति व्युत्पत्या क्रियते । अत्र समासघटकीभूताक्षिशब्दोऽत्र सकलेन्द्रियमात्रस्य बोधकः न तु नेत्रमात्रस्य बोधक इति । वृत्तिविषये त्वक्षिशब्दः सर्वेन्द्रियवाचकः न चक्षुपर्यायः इति नागोजिभट्टेनापि महाभाष्यस्योद्योतटीकायामुक्तम् (त्रिपाठी, २०७७, पृ. १७५) एतावता इन्द्रियजन्यज्ञानाविषयत्वमेव परोक्षत्वमिति पर्यवसति । महाभाष्यकारश्च महाभाष्ये च पूर्वपक्षिरूपेण परोक्षविषये चत्वारिमतान्युपस्थापयति । तत्र केषाञ्चिन्मते वर्षशतात् पूर्वकालिकं वृत्तं परोक्षमिति । अपरेषां मते च वर्षसहस्रात्पूर्वकालिकं वृत्तमिति, तथैव अन्येषां केषाञ्चिन्मते च कुड्यकुटान्तरितं परोक्षमिति । तथा च केषाञ्चन मते तु दिनत्रयात् पूर्वं कृतं वृत्तं परोक्षमित्युच्यते । भाष्यकृता तु चतुरः पक्षान् प्रतिपाद्य सिद्धान्तरूपेण न कश्चन सिद्धान्तोपस्थापितः । सिद्धान्ते च इन्द्रियजन्यज्ञानाविषयत्वमेव परोक्षत्वमिति । कौण्डभट्टेनापि भूषणग्रन्थे साक्षात्करोमीति ज्ञानाविषयत्वमेव परोक्षत्वमिति स्वीकृतम् । उक्तञ्च तेन तत्रैव ग्रन्थे परोक्षत्वं साक्षात्करोमीत्येतादृशविषयताशालिज्ञानाविषयत्वमिति (शास्त्री, सन् १९९१, पृ. १५८) । परोक्षत्वस्य कुत्र विशेषणत्वमित्यत्रापि बहवः विचाराः सन्ति । कस्य परोक्षत्वे भवति लिडिति जिज्ञासायां भाष्यकारेणापि त्रयः पक्षाः निर्दिष्टाः । कालस्य यदा परोक्षत्वं भवति तदा लिड् भवतु इति एवं कर्तुं नैव शक्यते । यतोहि तत्र सूत्रे कालाधिकाराभावेन कालस्य परोक्षत्वे लिडित्यर्थासम्भवाद् । क्रियायामपि विशेषणं नैव भवितुमर्हति । क्रिया नामेयमत्यन्तापरिदृष्टानुमानगम्या न शक्या पिण्डीभूता निदर्शयितुम् । तत्र हि क्रियायाः सर्वथा परोक्षत्वेन तत्र परोक्षत्वस्य विशेषणत्वं न सम्भवति । उक्तमपि वर्तते सम्भवव्यभिचाराभ्यां स्याद्विशेषणमर्थवदिति । नागेशेनापि परमलघुमञ्जूषायामुक्तम् - परोक्षत्वं कारके विशेषणं न तु क्रियायामिति

तस्या अतीन्द्रियत्वाद् व्यभिचाराभावेन न क्रियायां विशेषणमिति । यद्यप्यत्र क्रियायाः अप्रत्यक्षत्वे परोक्ष इति विशेषणं व्यर्थमेव यतो हि कस्याश्चित् क्रियायाः प्रत्यक्षत्वे तादृशक्रियाभिप्रायेण लिट्प्रयोगव्यार्वतनमेव तत्प्रयोजनं सम्भवति किन्तु न भवति काचिद् क्रियाप्रत्यक्षा तेन व्यावर्त्यभावाद् विशेषणस्य वैयर्थ्यं यदुक्तं तत्र विचारणीयं भवति । सामान्यतया पिण्डरूपेण क्रियायाः प्रत्यक्षत्वाभावेऽपि एकैकस्यावयवस्य प्रत्यक्षत्वं सम्भवति एव । यथा पश्य मृगो धावति इत्यादौ धावनक्रियायाः दर्शनक्रियाकर्मत्वाभिप्रायकः भाष्यप्रयोगः उपपद्यते । भूषणेऽपि कौण्डभट्टेन एतदेव प्रतिपादितम् तत्र हि पिण्डीभूतायाः निदर्शयितुमशक्यत्वेऽपि अवयवशः साक्षात्करोमीति प्रतीतिसम्भवाद् इति । एतवता साधनानां परोक्षे लिडित्यर्थ एव ज्यायान् । अतः एव व्यापाराविष्टानां क्रियानुकूलसाधनानामेवात्र पारोक्ष्यमिति, तेन अयं पपाच इत्यत्रानापत्तिः । अत्र हि व्यापारावष्टिानामिति कथनेन व्यापारकालिकसाधनानामेव पारोक्ष्यत्वं विवक्षितं तेन पपाच इति इति प्रयोगकाले पाककर्तुः प्रत्यक्षत्वेऽप पाककालविशिष्टे कर्तरि परोक्षत्वमबाधितमिति तेन न क्षतिः । पुनश्च यत्र क्रियाशब्दवाच्याधिश्रयणाधःश्रयणादिव्यापाराणां पिण्डीभूतत्वेन युगपत् प्रत्यक्षाविषयत्वेऽपि क्रमशस्तेषां प्रत्यक्षत्वं सम्भवति, किन्तु यत्रावयवशः अपि क्रियायाः प्रत्यक्षत्वं नास्ति तत्रैव परोक्षत्वमिति विभावनीयम् । यदा च स्वयमेव कर्ता भवति तदा लिट् लकारस्योत्तमपुरुषस्य प्रयोगो नैव सम्भवति । तत्र परोक्षत्वमेव नैव सम्भवति । भाष्यकारेणापि महाभाष्ये उक्तं वर्तते - सर्वथा उत्तमो न सिद्धयति । उदयनाचार्येण किरणावलीग्रन्थस्य मङ्गलाचरणे व्यातेने किरणावलीमुदयनः इत्यत्र उत्तमपुरुषस्य प्रयोगो विहितः । अत्रास्य प्रयोगस्य सर्वथासम्भवं भवतीति उक्त्वा कौण्डभट्टेन खण्डनं कृतम् । भूषणग्रन्थे उक्तं तैः व्यासङ्गादिना स्वव्यापारस्य परोक्षत्वोपपादनेऽपि बहुतरमनःप्रणिधानसाध्यशास्त्रार्थनिर्णयजनकशब्दरचनात्मके ग्रन्थे अनद्यतनत्वातीतत्वयोर्विस्तारक्रियायामसत्वेन अनद्यतनातीतत्त्वयोरभावेन तदर्थलिडसम्भव एव । दीक्षितस्तु सिद्धान्तकौमुद्याः लकारार्थप्रक्रियायां लकरार्थनिरूपणावसरे चित्तविक्षेपादिनोत्तमपुरुषेऽपि परोक्षत्वं भवतीति प्रतिपादयति । तत्र हि उत्तमपुरुषे चित्तविक्षेपादिना पारोक्ष्यमिति । यथा सुप्तोऽहं किल विललाप, बहु जगाद पुरस्तात्तस्य मत्त किलाहम् । इत्यादौ स्वव्यापारस्य वर्तमानतादशायां व्यासङ्गादिना स्वयमप्रतिसन्धाने, पुनश्च कार्येणानुमितौ क्रियायाः पारोक्ष्यसम्भवाद् लिड्लकारस्य प्रयोगो भवत्येवेति दीक्षितस्याशयः । इति सामान्यलिडर्थविचारः ।

**लुट्लकारार्थः**

भविष्यदनद्यतनेऽर्थे लुट्लकारस्य प्रयोगो भवति तेन अनद्यतनभविष्यत्वं लुट्लकारस्यार्थः । अनद्यतने भाविनीत्यर्थः (मिश्र, २०७३, पृ. ८८) । आदेशानामेव वाचकत्वमिति वदतां नागेशादीनां मते तु लुडादेशानां तिबादीनां भविष्यदनद्यतनार्थोऽधिकः । अनद्यतनत्वञ्च अद्यतनभिन्नत्वमिति । भविष्यत्वं नाम वर्तमानप्रागभावप्रतियोगित्वम् । नागेशस्तु मञ्जूषायां वर्तमानप्रागभावप्रतियोगिक्रियोपलक्षिततत्वमित्युक्तम् । भाष्यकारस्तु परिदेवने श्वस्तनी भविष्यन्त्यर्थ इति वार्तिकेन अनुशोचनेऽर्थे भविष्यत्सामान्येऽर्थे च लुड्लकारस्य प्रयोगो भवतीति प्रतिपादयति (त्रिपाठी, २०७७, पृ. २१०) । लुट्लकारस्य उदाहरणानि तु श्वो भविता, श्व भोक्ता इत्यादीनि भवन्ति ।

**लृट्लकारार्थः**

लृट् शेषे च । सामान्यभविष्यदर्थे एव लृट् लकारस्य प्रयोगो भवति (शर्मा, सन् २००४, पृ. ३०५) । लृट्लकारस्य भविष्यत्सामान्यार्थः इति कौण्डभट्टः । लृट् तिङस्तु भविष्यत्सामान्यमेवार्थ इत्युत्वा नागेशेनापि

अत्र वैमत्यं नैव प्रतिपादितम्, समाने एवार्थे स्वकीया सम्मति नागेशेनापि प्रदत्ता इति । भविष्यत्वञ्च वर्तमानप्रागभावप्रतियोगिसमयोत्पत्तिमत्वमिति भूषणे उक्तम् (मिश्र, २०७३, पृ. ८६) । तथा सति घटो भविष्यति, पटो भविष्यति इत्यादौ घटाभिन्नाश्रयावृत्तिवर्तमानप्रागभावप्रतियोगिसमयावच्छिन्नोत्पत्त्यनुकूलो व्यापारः इति सामान्यवाक्यार्थबोधो भवति ।

## लेट्लोडर्थविचारः

छन्दसि लिङर्थे लेट् इति सूत्रेण वेदे एव लेट्लकारस्य प्रयोगो भवति । तत्र लट्लकारापेक्षया लटि अडाटौ विशेषः । यथा लटि भवति इति भवति तत्रैव लेटि भवाति इति भवति । अन्यत्समानमेव । लेट्लकारस्यापि विध्यादिरेवार्थः । लिङ्लकारस्य योऽर्थः सैव लेट्लकारस्येति । लोट् च इति सूत्रार्थनिरूपणावसरे दीक्षितेनापि कौमुद्यामुक्तम् - विध्याद्यर्थेषु लोट्लकारो भवति (शर्मा, सन् २००४, पृ.३०९) । भूषणे च कौण्डभट्टेन लोडर्थः प्रार्थना इत्युक्तम् । अशिषि लिङ्लोटौ, लोट् च इत्यादिसूत्रज्ञापनाद् विध्याद्याशिषादयोऽप्यर्थाः लोट्लकारस्यैव भवन्ति । यथा - भवतु ते शिवप्रसादः इत्यत्राशिष्यर्थे भवति लोट्लकारः । लिङ्लकारेण साकं समानार्थकत्वल् लिङ्लकारस्यार्थनिर्णयानन्तरमेव एतयोरर्थनिर्णयो भवति तेन पूर्वमत्र लिङर्थनिरूपणमावश्यकम् ।

## लिङ्लकारार्थविचारः

लिङ्लकारस्य विध्यादिरेवार्थः । आचार्येण पाणिनिना तत्र अष्टाध्यायीग्रन्थे विधिनिमन्त्रणा-मन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् इति सूत्रमुक्तम् तेन शाब्दिकाः विध्यादयः एव विशेषेण लिङर्थाः स्वीकुर्वन्ति । विधिर्नाम प्रेषणम् । प्रेषणञ्च भृत्यादेः कस्याञ्चित् क्रियायां नियोजनमिति कैयटाभिप्रायः तत्रैव सर्वेषां वैयारणनां सम्मतिरस्ति । यथा स्वापेक्षया निकृष्टस्य भृत्यस्य स्वाभिलषितेऽर्थे प्रवर्तनमिति । यथा कश्चन स्वामी भृत्यं प्रति कथयति भवान् वस्त्रं प्रक्षालयेदिति । तथा च अग्निहोत्रं जुहूयात्, स्वर्गकामो यजेत्, इत्यादावपि विधिरेव । अत्रापि विधिरेव तत्र हि श्रुतिः यागादिकार्येऽप्रवृत्तान् अस्मान् अपूर्वनिर्देशनपूर्वकं प्रेरयति । निमन्त्रणञ्च नियोगकरणम् नियोगतः अर्थाद् अवश्यम्भावेन यत्करणं तन्निमन्त्रणम् । यथा आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्त्तनमिति । यथा इह श्राद्धे भवान् भुञ्जीत इति । तथा च भाष्येऽपि भाष्यकारेण प्रोक्तम् एवं तर्हि यन्नियोगतः कर्तव्यं तन्निमन्त्रणमिति ((त्रिपाठी, २०७७, पृ. २३६ ) । आमन्त्रणञ्च कामाचारानुज्ञा । स्वाभिलषिते कामाचारेण प्रवर्त्यप्रवर्तनम् । कामाचारश्च प्रवर्त्यो यो भवति तस्यैवेति । यथा यथारब्धं कुरुष्व, तत्कुरुष्व यथा हितमिति, यथेच्छं कुर्याः इति । भाष्यकारेणापि निमन्त्रणामन्त्रणयोर्भेदं प्रतिपादयन् कथयति आमन्त्रणे कामचारः इति । तत्रैवोद्यते च नागेशेनापि व्याख्यातम् यत्र भोजनाद्यननुष्ठानेऽपि न प्रत्यवायस्तद्विषया प्रवर्तनामन्त्रणमिति तात्पर्यम् । कौण्डभट्टोऽपि एवमेव स्वीकरोति आमन्त्रणञ्च कामाचारानुज्ञेति । तथा च अधीष्टम् = सत्कारपूर्वको व्यापार इति । यथा - भवान् माणवकमध्यापेद् इति । अत्र यदवधेयं भवति अधिपूर्वकाद् इष्धातौ क्तप्रत्यये कृते सति अधीष्टशब्दस्य सिद्धिर्जायते तेन निष्ठाप्रत्ययान्तस्य अधीष्टशब्दस्य निष्ठा इति सूत्रेण नपुंसकत्वविधानाद् अधीष्टमित्येव भवति न तु अधीष्टः इति । भाष्ये च अधीष्टं नाम सत्कारपूर्विका व्यापारणा इति भाष्यकारेणाभिहितम् । तथा च सम्प्रश्नः- सम्प्रधारणम् तद्वा कर्तव्यमिदं वा कर्तव्यम् ? इत्यादिरूपो विचारः सम्प्रश्न इति । यथा - किं भो व्याकरणं भवानधीयिय उत तर्कम् ? इति । प्रार्थना च स्वाऽभिलषितवस्तुदानादौ स्वीयेच्छाबोधनमिति । यथा भवान् अन्नं मे दद्यादिति । अत्र च लिङ्विधायके विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् इति सूत्रे विधिनिमन्त्रणेत्यादीनां षण्णामुपादानं

विद्यते तथापि विध्यादिषु चतुर्षु अन्यदीयप्रवृत्तिजननानुकूलव्यापारत्वरूपस्य प्रवर्तनात्वस्यानुस्यूतत्वात् प्रवर्तनात्वमेव विध्याद्यर्थनिष्ठशक्यतावच्छेदकम्, न तु पृथक् पृथक् विधित्व-निमन्त्रणात्वादिकं शक्यतावच्छेदकमिति । अनेकशक्यतावच्छेदकत्वस्वीकारे गौरवाद्, शक्तेर्नानात्वप्रसङ्गाच्च । तेन लाघवादेकं प्रवर्तनात्वमेव शक्यतावच्छेदकं स्वीकर्तव्यमिति। प्रवर्तनात्वञ्च प्रेरणात्वाऽपरपर्यायमखण्डोपाधिरिति विज्ञेयम्। भर्तृहरिणाप्युक्तम् -

अस्तिप्रवर्त्तनारूपमनुस्यूतं चतुर्ष्वपि ।
तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया ।

ननु एवं सति विधिनिमन्त्रणेति सूत्रे विधिनिमन्त्रणेत्यादिचतुर्णां ग्रहणं व्यर्थमिति वाच्यम् ? सूत्रञ्च प्रवर्तनासम्प्रश्नप्रार्थनेषु लिङ् इत्येवास्तु सूत्रेऽपि लाघवं भवति । अथवा पृथक् तया प्रवर्तनायां लिङ् इत्येव सूत्रमस्तु इति चेद् तत्रैव वाक्यपदीयग्रन्थे आचार्येण भर्तृहरिणाभिहितम् -

न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथापि वा ।
विद्ध्यादीनामुपादानं चतुर्णामादितः कृतम् ॥

अर्थात् सूत्रकारेण प्रपञ्चार्थं, न्यायव्युत्पादनार्थं वा अर्थभेदमाश्रित्य भेदेन विधिनिमन्त्रणादीनामुपादानं विहितम् । तत्र प्रपञ्चार्थमित्यस्य व्याख्यानं पञ्चोलिना भूषणस्य प्रभाटीकायां एवं कृतम् - प्रपञ्चार्थमिति प्रवर्तनात्वस्य शक्यतावच्छेदकत्वे तेन रूपेण विध्यादिष्वेव शक्तिरिति विस्तरेण ज्ञानार्थमिति भावः । एतावता विध्यादीनां प्रवर्तनात्वेनैव वाच्यतेति वैयाकरणानां सिद्धान्तः । तथा च प्रवर्तनात्वं किम् ? इत्यत्र विदुषां मतैक्यं नैव प्राप्यते । प्रवर्तनात्वञ्च प्रवृत्तिजनकज्ञानविषयतावच्छेकत्वम् तच्चेष्टसाधनत्वमेव तदेव लिङर्थः इति नागेजीभट्टेन परमलघुमञ्जूषायामुक्तम (मिश्र, २०७३, पृ. १२८) । कौण्डभट्टोऽपि भूषणे प्रवर्त्तनात्वञ्च प्रवृत्तिजनकज्ञानविषयतावच्छेकत्वम् । तच्चेष्टसाधनत्वस्यास्ति तदेव विध्यर्थः इत्युक्तम् (मिश्र, २०७३, पृ. ९६) । तेन सामान्यतया वैयाकरणानां निकाये प्रवर्तनारूपो व्यापारः इष्टसाधनत्व रूप एव । यथा लोके सर्वत्र इदं कार्यं मदिष्टसाधनमिति निश्चयं कृत्वैव जनानां कार्येषु प्रवृत्तिर्जायते । यथा लोके प्रयोजकवाक्यश्रवणानन्तरं प्रयोज्यवृद्धस्य प्रवृत्तिं दृष्ट्वा समीपस्थः जिज्ञासुबालः स्वप्रवृत्तिसाधनेन पूर्वं तावद् इष्टसाधनताज्ञानमनुमिनोति। अनुमानस्वरूपञ्च - प्रयोज्यवृद्धस्य अस्मिन्कर्मणिप्रवृत्तिः इष्टसाधनज्ञानपूर्विका, प्रवृत्तित्वात्, मदीयप्रवृत्तिवद् (मिश्र, २०४०, पृ. ५७) । एवं प्रकारेण इष्टसाधनताज्ञानेऽनुमिते सति तस्य ज्ञानस्य कारणं किम् ? इति जिज्ञासायां तज्ज्ञानस्य लिङ्घटितवाक्यश्रवणानन्तरभावितत्वात् तस्मिन् ज्ञाने तद्वाक्यजन्यत्वमवधारयति । तथा च लिङादिशब्दादेव तस्य प्रतीयमानत्वाद्, इष्टसाधनत्वस्य च लिङ्वाच्यत्वाद्, तस्य प्रवर्तकत्वाच्च प्रवर्तनात्वरूपत्वमिति निश्चयं करोति । एतावता च इष्टसाधनत्वमेव प्रवर्तनात्वेन रूपेण विध्यर्थो भवतीति वैयाकरणानां सम्मतिः । यद्यपि प्रवृत्तिं प्रति कृतिसाध्यत्वज्ञानस्य तथा च बलवदनिष्टाननुबन्धित्वज्ञानस्य च कारणत्वमस्तीति केषाञ्चिदाशयो वर्तते । तयोः कारणत्वे व्यभिचारदर्शनाद् प्रवृत्तिं प्रति कारणत्वं नाङ्गीक्रियते शाब्दिकैरिति । यथा कृतिसाध्यत्वज्ञानस्याऽपि सुमेरुश्रृङ्गाहरणादावप्रवृत्या प्रवृतिप्रयोजकत्वेन कृतिसाध्यत्वेऽपि प्रवर्तनालक्षणसमन्वयस्तथाऽपि लिङस्तदंशे शक्तिर्नास्ति, तस्यांशस्य लोकतः एव लब्धत्वात् अनन्यलभ्यो हि शब्दार्थः इति न्यायस्य विद्यमानत्वादिति । तथा च मधुविषसम्पृक्तान्नभोजने

तृप्तिरूपेष्टसाधनत्वमप्यस्ति कृतिसाध्यत्वमप्यस्ति तथापि बलवदनिष्टानुबन्धित्वस्य विद्यमानत्वाद् प्रवृत्त्यभावो दृश्यते । एतावता प्रवृत्तिं प्रति कृतिसाध्यत्वरूपज्ञानस्य तथैव बलवदनिष्टाननुबन्धित्वज्ञानस्य च कारणत्वं भवितुमर्हति । किन्तु एतयोः कारणत्वं नैव स्वीक्रियते । कृतिसाध्येऽपि वस्तुनि वृथाश्रमजनतयेष्टजनकत्वाभावज्ञानेन द्वेषात् प्रतिबन्धकसत्वात् वा कदाचित् प्रवृत्त्यभावदर्शनाद् व्यभिचारः । तथैव आस्तिककामुकस्य परस्त्रीगमने नरकादिबलवदनिष्ठाननुबन्धित्वेऽपि रागौत्कट्या प्रवृत्तिदर्शनेन व्यभिचारः इति तेनान्वयव्यतिरेकव्यभिचाराभ्यां कृतिसाध्यत्वबलवदनिष्ठाननुबन्धित्वयोः प्रवृत्तिं प्रति कारणत्वाभावेन प्रवर्तनत्वाभावाद् न तयोः लिङ्वाच्यत्वमिति । नागेशोऽपि कथयति परमलघुमञ्जूषायाम् - न तु कृतिसाध्यत्वं तस्य यागादौ लोकत एव लाभादित्यन्यलभ्यत्वात् । न च बलवदनिष्टाननुबन्धित्वं, द्वेषाभावेनान्यथासिद्धत्वात् इत्यन्यत्र विस्तरः (मिश्र, २०७३, पृ. १२९) । कौण्डभट्टमतेऽपि कृतिसाध्यत्वस्य बलवदनिष्ठाननुबन्धित्वस्य वा लिङ्वाच्यत्वं नास्ति, अपि तु इष्टसाधनत्वस्यैवेति । आचार्यमण्डनमिश्रस्याप्यस्मिन्नेवार्थे स्वकीया सम्मतिः वर्तते । विधिविवेकनामके स्वकीये ग्रन्थे एवं कथयति -

पुंसो नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्तकः ।
प्रवृत्तिहेतुं धर्मञ्च प्रवदन्ति प्रवर्तनाम् ।

एतावतेष्टसाधनत्वस्यैव लिङ्वाच्यत्वमेवेतिवैयाकरणानां सर्वसम्मतो राद्धान्त इति ।

## लङ्लकारार्थनिरूपणम्

आचार्यपाणिनिना अनद्यतने लङ् इति उक्तम् । तस्य सामान्यार्थो भवति- अनद्यतनभूतार्थवाचकाद् धातोर्लङ्लकारो भवतु इति । अत्रानद्यतनत्वञ्च पूर्ववद् अद्यतनभिन्नत्वमेवेति । भूतत्वमपि वर्तमानध्वंसप्रतियोगिक्रियोपलक्षितत्वमिति पूर्वमेव व्याख्तामुपरि । यथा च अस्य पुत्रोऽभवत्, घटोऽभवद् वा इत्यादौ पुत्रकर्तृकं घटकर्तृकं वा अनद्यतनभूतकालिकं भवनमिति बोधः ।

लुङ्लकारार्थनिरूपणम्

भूतसामान्यमेव लुङ्लकारस्य सामान्यार्थः । लुङ् इति सूत्रनिर्देशात् सामान्यतया सामान्यभूत एव लुङ्लकारस्यार्थो भवति । कौण्डभट्टेनापि भूषण एवमुक्तम् भूतसामान्ये लुङिति । नागेशोऽपि एवं वदति लुङादेशस्य तु भूतसामान्यमर्थः इति । यद्यप्यत्र भूतत्वं च सामान्यपूर्वोक्तं लङ्लकारार्थाभिन्नमेव, तथापि लङ्वाच्यो भूतोऽनद्यतनरूपः, लुङ्वाच्यस्तु सामान्यभूतः इति विशेषः । तथा च सामान्यविशेषयोरैक्यात् कदाचिद् भूतविशेषेऽपि भूतत्वमात्रविवक्षायां लुङ्लकारस्य प्रयोगो भवत्येवेति । यथा घटोऽभूदिति । अत्र च विद्यमानध्वंसप्रतियोगी घटाभिन्नाश्रयक उत्पत्याद्यनुकूलो व्यापार इति शाब्दबोधः ।

## लृङ्लकारार्थनिरूपणम्

लिङ्निमित्ते लृङ् क्रियातिपत्तौ, इति सूत्रेण लृङ्लकारस्य विधानं भवति । सूत्रस्यार्थो भवति क्रियायाः अनिष्पत्तौ भूते भाविनि च हेतुहेतुमद्भावे सति लृङित्यर्थः । अत्र लिङ्लकारस्य निमित्तं च हेतुहेतुमद्भावादिः । दीक्षितेनाप्युक्तम्- हेतुहेतुमद्भावादिः लिङ् निमित्तकम् । मञ्जूषायां नागेशोऽपि कथयति लृङादेशस्य तु

क्रियातिपत्तौ गम्यमानायां हेतुहेतुमद्भावे च गम्यमाने भूतत्वं भविष्यत्वञ्चार्थ इति । सामान्यतया लङ्लिङ् लुङ्लृङिति चतुर्णां ङितां लकाराणामर्थं प्रतिपादयन् कोण्डभट्टः कथयति -

ह्यो भूते प्रेरणादौ च भूतमात्रे लङादयः ।
सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ्स्मृतः ।

तथा च चतुर्षु लकारेषु कर्तृकर्मसंख्याकालादीनां साम्येऽपि कालविशेषे भेदो दृश्यते । कालस्य एकत्वेऽपि व्यवहारदृष्ट्या भेदः कल्प्यते । कालभेदस्तु लकारार्थनिर्णयानुसारेणेति । यथा पूर्वं तावत् कालो द्विविधः अद्यतनः, अनद्यतनश्चेति । तत्र प्रथमस्तावद् भूतभविष्यत्वर्तमानभेदेन त्रिविधः । द्वितीये च वर्तमानत्वासम्भवाद् भूतभविष्यत्भेदेन द्विविधः एवेति । आचार्यभर्तृहरिस्तु स्वकीयवाक्यपदीयग्रन्थे कालस्य व्यवहारिकदृष्ट्या एकादशभेदाः सन्तीति वर्णयति । तथा च तत्र ग्रन्थे -

भूतपञ्चविधस्तत्र भविष्यंश्चतुर्विधः ।
वर्तमानो द्विधा ख्यात इत्येकादश कल्पना ॥

तथा च सामान्यतया वर्तमानत्वे लट्, भूतत्वमात्रे लुङ्, भविष्यत्त्वमात्रे लृट्, हेतुहेतुमद्भावाद्यधिकार्थविवक्षायां लृङ्, अनद्यतने भूतत्वेन विवक्षिते लङ्, पुनश्च तत्रैव परोक्षत्वविवक्षायां लिट् तथा चानद्यतनभविष्यति लुडिति एवं प्रकारेण लकाराः भवन्तीति विज्ञेयम् । वैयाकरणनिकाये एतेषामर्थानां वाचकाः लडादयो लकाराः भवन्ति आहोस्वित् लडादेशाः तिबादयः ? इत्यत्र वैमत्यं दरीदृश्यते । नागेशमते तत्र न लकारादयः वाचकाः अपि तु आदेशानामेव अर्थात् तिबादीनामेव वाचकत्वमिति नागेशाभिप्रायः तेन नागेशेन मञ्जूषादिग्रन्थे लकारार्थनिरूपणावसरे आरम्भ एव लादेशार्थविचारः इति कथयति । यद्यपि कौण्डभट्टस्तु लकारार्थनिरूपणमिति वदति तथापि पूर्वापरशास्त्रपर्यालोचनया ज्ञायते यद् कौण्डभट्टमते आदेशानां तिबादीनां वाचकत्वम्, लकाराणां वा इत्यत्र नास्ति कश्चन विशेषाग्रहः इति । इति सामान्यलकारार्थनिरूपणमिति । इति शम् ।

## निष्कर्षः

अत्रालेखे दशलकाराणां सामान्यपरिचयनिर्देशनपूर्वकं तेषां सोदाहरणं व्याख्यानमपि कृतमस्ति । विशेषरूपेण आचार्यनागेशभट्टस्य तथा च आचार्यकौण्डभट्टस्य च लकारार्थविषये यानि मतानि सन्ति तेषां निरूपणं तथैव तयोर्मध्ये यन्मतवैविध्यं विद्यते तस्य भाष्यदिशा समाधानं विहितम् । मध्ये मध्ये कालविषये तथा च कालभेदविषये च आचार्यभर्तृहरेः यन्मतं तस्यापि सप्रमाणमत्रोपन्यस्तम् । लकाराणां वाचकत्वम् आहोस्वित् लादेशानां तिबादीनां वा वाचकत्वं भवति इत्यस्यापि विशेषव्याख्यानमत्र कृतम् । आदेशानां स्थानिनां वा यत्र कुत्रापि वाचकत्वस्वीकारे वैयाकरणां कृते तथा पार्थक्यं नैव दृश्यते कल्पितवाचकत्वस्य उभयत्र विद्यमानत्वात् । कालपरिचयः, वर्तमानत्वपरिष्कारः, भविष्यत्त्वपरिष्कारः, भूतत्वपरिष्कारः परोक्षत्वविचारः, अद्यतनानद्यतनयोरर्थपरिष्कारः, लिङर्थपरिष्कारः तथा च दर्शनान्तरदिशा व्याख्यानं लकाराणां विशिष्य व्याख्यानमप्यत्र कृतमस्ति । लट्लकारादारभ्य लृङ्लकारपर्यन्तं सर्वेषां लकाराणामूहापोहपूर्वकं पृथग् पृथग् प्रकरणविभाजनं कृत्वाऽध्ययनमत्राचरितम् ।

**कृतज्ञताज्ञापनम्**

आलेखेऽस्मिन् परमलघुमञ्जूषावैयारणभूषणसारग्रन्थदिशा लकारार्थनिरूपणविषयेऽनुसन्धनात्मकालेखगतप्रविध्यादिविषये च परामर्शदातृभ्यो विद्वद्भ्यो गुरुजनेभ्यश्च हार्दं धन्यवादं विनिवेदयामि ।

## सन्दर्भसामग्रीसूची

द्विवेदी, चन्द्रिकाप्रसाद. (सन् २०१८). *वैयाकरणभूषणसार.* चौखम्बासंस्कृतप्रतिष्ठानम् ।

पञ्चोली, बालकृष्ण. (२०६८). *वैयाकरणभूषणसार.* चौखम्वासंस्कृतसंस्थानम् ।

मिश्र, आद्यप्रसाद. (सन् १९७३). *वैयाकरणभूषणसार.* सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः ।

मिश्र, वंशीधर. (सन् २००६). *परमलघुमञ्जूषा.* चौखम्बाविद्याभवनम् ।

मिश्र, राममनोहर. (२०४०). *भूषणसार-परमलघुमञ्जूषयोः सिद्धान्तानां समीक्षा.* सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः ।

शर्मा, गिरिधर. (२००४). *वैयाकरणसिद्धान्तकोमुदी.* मोतिलालवनारसीदासः ।

शास्त्री, नन्दकिशोर. (सन् १९९१). *वैयाकरणभूषणसार.* भार्गपुस्तकालयाध्यक्षः ।

शुक्ल, सूर्यनारायण. (सन् २०१९). *वाक्यपदीयम्.* चौखम्वासंस्कृतसंस्थानम् ।

त्रिपाठी, जयशंकरलाल. (२०७७). *व्याकरणमहाभाष्यम्.*चौखम्बा-कृष्णदासअकादमी ।

त्रिपाठी, जयशंकरलाल. (२०४१). *परमलघुमञ्जूषा.*चौखम्बा-कृष्णदास-अकादमी ।